# Shri Vanadrinatha Stotram

# શ્રીવાનાદ્રિનાથસ્તોત્રમ્

## Document Information

Text title : Shri Vanadrinatha Stotram 06 40

File name : vAnAdrinAthastotram.itx

Category : vishhnu, vishnu, stotra

Location : doc_vishhnu

Description/comments : From stotrArNavaH 06-40

Latest update : June 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 11, 2024

*sanskritdocuments.org*

# શ્રીવાનાદ્રિનાથસ્તોત્રમ્

વન્દેઽહં વનશૈલનાથમહિષીં વાત્સલ્યપૂર્ણાં શ્રિયં
ભક્તાભીષ્ટફલપ્રદાં ભગવતી કારુણ્યરૂપાં હરેઃ ।
ભૂષાભૂષિતવિગ્રહાં મમ પુનઃસૌખ્યપ્રદાં સુન્દરી
મન્દસ્મેરશુભારવિન્દવદનાં લક્ષ્મી જગન્માતરમ્ ॥ ૧॥

માતઃ શ્રીવનશૈલનાથદયિતે પદ્માલયે સુન્દર
શ્રીભૂષે તવ પાદપદ્મયુગલં મૂર્ધા નતોઽસ્મ્યાદરાત્ ।
દેવિ ત્વાં શરણં ગતે મયિ કૃપા શીઘ્રં ત્વયા કેવલં
કર્તવ્યેતિ સરોજકાન્તવદને ત્વત્સન્નિધૌ પ્રાર્થયે ॥ ૨॥

વન્દે મુન્દર તમિન્દિરાભૂમિનાયકમ્ ।
પ્રણતાર્તિહરં સમ્યક્ પરમસ્વામિન વિભુમ્ ॥ ૩॥

કલ્યાણં વૃષભાદ્રીન્દુઃ પુણ્ડરીકદલેક્ષણઃ ।
સર્વેષાં મોહકઃ શ્રીમાન્ સુન્દરો દિશતાન્મમ ॥ ૪॥

વિષ્ણ્વનિમણિમજીપ્રભવા યા સરિદ્વરા ।
વક્ષ્યામિ વૈભવં તસ્યા ગઙ્ગાયાશ્ચ યથામતિ ॥ ૫॥

પ્રહ્લાદો ભગવત્કટાક્ષજનિતજ્ઞાનપ્રભાવપ્રમઃ
સારાસારવિવેકહારતરલો વૈરાગ્યનિષ્ઠામણિઃ ।
શ્રીમાન્ ભૂતદયાલુરાત્મગુણકઃ શ્રીવૈષ્ણવશ્રીનિધિઃ
શ્રીનારાયણદિવ્યપાદકમલધ્યાનોજ્જ્વલઃ સર્વદા ॥ ૬॥

તત્પુત્રસ્તુ વિરોચનઃ પ્રભુવરો ભૂમણ્ડલે વિશ્રુતઃ
પુત્રસ્તસ્ય બલિસ્તુ સત્યવચનઃ શ્રીમાનભૂભૂપતિઃ ।
કૃત્વા સોઽપિ તપશ્ચિરાય વિબુધૈરન્યૈર્જનરાયુધૈ
સ્તિમ્ભિશ્ચ મૃગૈરવાપ ફણિભિઃ સર્વૈરવધ્યં વરમ્ ॥ ૭॥

તસ્માત્ સોઽપિ બલિઃ સમસ્તભુવનં જિત્વા મહાવીર્યવાં

ત્રૈલોક્યં બુભુજે સ્વયં કુલિશભૃન્મુખ્યાઃ સમસ્તાઃ સુરાઃ ।
નાનાદિક્ષુ પલાયિતાશ્ચ ગલિતસ્વસ્વાધિકારાસ્તતો
ભીતાઃ શૈલગુહાં પ્રવિશ્ય ન્યવસંસ્તુલ્યા દિવાભીતકૈઃ (૧) ॥ ૮॥

મેરૌ તત્ર યુગાન્ બહૂન્ સુરગણાઃ સ્થિત્વાથ રક્ષાર્થિનો-
બ્રહ્માણં પ્રણિપત્ય ચાહુરપરૈર્દૂરીકૃતાસ્તે વયમ્ ।
બ્રહ્મન્ પાલયિતા સમસ્તજગતાં કર્તા ત્વમેવ પ્રભો
યુષ્મદ્દત્તવરો બલિસ્તુ બુભુજે ત્રૈલોક્યલક્ષ્મી સ્વયમ્ ॥ ૯॥

તસ્માત્તેન મહાબલેન ચકિતાઃ સર્વે વયં નાશ્રયા
બ્રહ્મન્ કિઞ્ચિદવિઘ્નહે તવ ષદાત્ સ્થાનાનિ નઃ સન્દદાઃ ।
વિજ્ઞપ્તઃ સ પિતામહસ્તુ વિબુધૈઃ પ્રોવાચ તાનિર્જરાન્ ।
મા ભીર્વો મઘવત્પ્રમુખ્યવિબુધાઃ ક્ષેમં તં પ્રાપ્સ્યથ ॥ ૧૦॥

ઇત્યુક્ત્વા સ પિતામહશ્ચ વિબુધાનાશ્વાસ્ય દધ્યૌ હરિ-
સર્વાભીષ્ટફલપ્રદં પ્રણમતા નારાયણં વત્સલમ્ ।
ભૂમાભ્યાં સહિતં સમસ્તજગતાં સર્ગોપસર્ગસ્થિતીઃ
કુર્વન્તં ભગવન્તમદ્ભુતગુણં વેદાન્તવેદ્યપ્રભમ્ ॥ ૧૧॥

શ્રીમાનિષ્ટવરપ્રદઃ પ્રણમતાં નારાયણ શ્રીપતિ-
સ્તસ્ય પ્રાદુરભૂત્ સરોજભવનો ભક્તિપ્રકર્ષાવધિઃ ।
તં દેવં વિમલં મહાગુણગણ નત્વા તતક્લેશહમ્ ।
લોકાનાં પતિરબ્રવીન્મતિમતાં બ્રહ્મા મહાત્મા વરઃ ॥ ૧૨॥

ઇન્દ્રાદ્યાઃ સકલા હરે સુરગણાઃ સ્થાનાદિરિક્તા ઇવ
વર્તન્તે કિલ સામ્પ્રતં પ્રણમતાં તેષામભીષ્ટં દ્રુતમ્ ।
લક્ષ્મીનાયક દાતુમર્હસિ વિભો કારુણ્યવારાન્નિધે
શ્રુત્વા તસ્ય પિતામહસ્ય વચનં બ્રહ્માણમૂચે હરિઃ ॥ ૧૩॥

જ્ઞાતં મે મનસિ સ્થિતઃ પુનરિદં બ્રહ્મન્ પુરા તદ્વધ
વિન્દ્રસ્યાવરજો ભવામિ જઠરે શ્રીકાશ્યપસ્યાદિતેઃ ।
ભૂત્વા ચ વટુર્મનોહરગુણસ્તસ્ય શ્રિયં યાઞ્ચયા
હૃત્વેન્દ્રાય તદુત્તમં પુનરિદં દાસ્યામિ દિવ્યં પદમ્ ॥ ૧૪॥

ઇત્યાશ્વાસ્ય વિધિં પ્રભુસ્ત્રિજગતામાવિબભૂવાવિશં
શ્ચિત્તં તસ્ય તુ કાશ્યપસ્ય તરસા ગર્ભં ગતશ્ચાદિતેઃ ।
વિખ્યાતોઽયમુપેન્દ્ર ઇત્યથ પુનઃ શ્રીવામનાકારકો

વિષ્ણુઃ સોઽપિ તપશ્ચકાર ભગવાન્ ધ્યાયન્ સ્વકાર્યં હૃદા ॥ ૧૫॥

કિઞ્ચિત્કાલમસૌ વસન્ ભુવિ વિભુઃ સિદ્ધાશ્રમે કેશવો
ગત્વા ત્રીણિ પદાન્યયાચત હરિઃ શ્રીયજ્ઞશાલા બલેઃ ।
ધર્મજ્ઞસ્તુ સ દત્તમિત્યકથયદ્દારા ચ દેયા પ્રભો
વાચા નાલમુવાચ કિં તપસિ મે વિષ્ણુઃ સદા તિષ્ઠતઃ ॥ ૧૬॥

વાચા તં ભગવાન્ બલિં બલવતાં વ્યામોહયિ હ્ય દત્વા વરં
સમ્ફુલ્લામ્બુજપાણિના સ તુ પુનર્જગ્રાહ દાનોદકમ્ ।
તત્રાસૌ વવૃધે મહાન્ દ્વિપદતબૈલોક્યમાક્રમ્ય વૈ
કૃત્વાહ સ્વવશે પુનર્બલિમપિ ત્વેકં પદં દેહિ મે ॥ ૧૭॥

ઇત્યુક્તસ્તમુવાચ સત્યવચનો નીલાવિશિષ્ટો બલિ
શ્ચાધત્સ્વૈકપદં શિરસ્યપિ મમ પ્રોક્તઃ પ્રહસ્ય પ્રભુઃ ।
પાતાલે બલિનં તુ દિવ્યકૃપયા નારાયણઃ પ્રાક્ષિપત
પ્રીતસ્તસ્ય પદં તદા તુ સમયે સંક્ષાલિતં બ્રહ્મણા ॥ ૧૮॥

ભાતિ વ્યોમ્નિ જયોદ્ધૃતા સ્મ સલિલં તર્જ પતાકેવ તુ
સદ્ગગા યવહત્ સુરૈર્દિવિ પુનઃ સિદ્ધાદિભિઃ સેવિતા ।
ગઙ્ગાદ્યાપિ વિરાજતે બલિરિવઽયોમસ્થલે સા પુનઃ
સ્રોતોભિસ્તિસૃભિઃ કિલ પ્રવહતી ભૂમ્યન્તરિક્ષાદિષુ ॥ ૧૯॥

ત્રિવિક્રમપદાશ્લિષ્ટમણિનૂપુરપૂરિતમ્ ।
જલં તલૂનનાદત્ર ગિરિમૂનિ સમાપતાત્ ॥ ૨૦॥

નિર્ઝરીભૂય શૈલેઽસ્મિન્નિર્જરૈરપિ સેવિતા ।
રમણીયજલા સા હિ માધુર્યગુણશાલિની ॥ ૨૧॥

યન્મૂર્તિ સ્રવતી કચિન્મરતકસ્નિગ્ધેન્દ્રનીલોપમા
વૈદૂર્યોપલસન્નિભા કચન વૈ મુક્તાફલામા કચિત્ ।
મુક્તાનાં પ્રભવા નદી સુવિમલા વજ્રોપલાભા કચિત્
લોકેઽસ્મિન વિરજેવ તં વનગિરિ શેષાવતારં ભજે ॥ ૨૨॥

ગન્ધર્વૈરપિ સિદ્ધચારણસુરૈર્વિદ્યાધરૈઃ સેવિતા
દિવ્યોદ્યાનલતાતરૂન વનગિરૌ સંવર્ધયન્તી સદા ।
સ્નિગ્ધેઽમિત્રિદશાપગેવ જનની દિવ્યૈઃ પયોભિઃ સ્વકૈ
યસ્મિન્નૂપુરસમ્ભવા કિલ સતી શ્રીમદ્વનાદિ ભજે ॥ ૨૩॥

કાન્તેવાબ્ધિસુતા વનાદ્રિવસતઃ શ્રીસુન્દરસ્ય પ્રભો
ભવ્યા ભતેપદાશ્રયેવ ચરણૌ ક્રાન્તત્રિલોકો હરેઃ ।
સંવાહિસ્વકરામ્બુજા મણિસરૈર્મુક્તાસરૈર્ભૂષિતા
ગઙ્ગા નૂપુરસમ્ભવા વનગિરૌ સન્દૃશ્યતે યોગિભિઃ ॥ ૨૪॥

સાયુજ્યં તુ મરીચિમુખ્યમુનયો ધર્મોઽપિ સાલોક્યતાં
સામીપ્ય ચતુરાનનસ્તુ સુતપાઃ સારૂપ્યમાપ્લુત્ય વૈ ।
યસ્યાં નિર્મલકાયકા વનગીરૌ વિષ્ણોઃ પ્રયન્તિક્રમાત
ગઙ્ગા નૂપુરસમ્ભવા સુવિમલા સા નઃ પુનાતુ ક્ષણાત્ ॥ ૨૫॥

ભારદ્વાજકુલોદ્ભવસ્તુ સુતપાઃ કશ્ચિદ્વૃષાખ્યે ગિરૌ
સિદ્ધાભીષ્ટકસિદ્ધિકારિણિ તપસ્તેપે કદાચિન્મુનિઃ ।
મોક્ષાર્થી ત્વઘમર્ષણોત્સુકમના મઞ્જીરગઙ્ગોદકે
શ્રીસૂક્તાનિ જપન્ શુચિશ્ચિરતરં ગાઢં વગાહ્ય સ્થિતઃ ॥ ૨૬॥

દુર્વાસાપ્રમુખાસ્તદા ચ સમયે ત્વાયાન્તિ યોગીશ્વરાઃ
દૃષ્ટ્વા દીર્ઘમસૌ નિમજ્જતિ મુનિસ્ત્વસ્માનનાહત્ય વૈ ।
મોક્ષાર્થી ભવતીતિ તે તુ મુનયો મત્વાશપન્ કોપતઃ
મણ્ડૂકો ભવ દુર્મતે તટગાતાન્નાવેક્ષ્ય મગ્નો જલે ॥ ૨૭॥

નાવજ્ઞા ન તુ કૃતા મયેતિ સુતપાસ્તીર્થાવગાહાચિરં
જ્ઞાત્વા તીર્થકરાન્ મહાત્મન ઇમાન્ પૂજ્યાસ્તટે તિષ્ઠતઃ ।
ઇત્યૂચે કૃપયા ક્ષમધ્વમિતિ તાન્ યોગી પ્રણમ્યાબ્રવીત્
સૂક્તાનામવસાનમીક્ષ્ય મુનયઃ કિઞ્ચિદ્વિલમ્બ્ય સ્થિતઃ ॥ ૨૮॥

ઇત્યુક્ત્વાથ સ થાતનં તુ મલિનં તે ચાબ્રુવન્ ભેકતાં
તત્ર ત્વં તુ જિહાસ્યસીતિ કૃપયા શ્રીસુન્દરસ્ય પ્રભોઃ ।
ઇત્યુક્ત્વા મુનયરતુ નૂપુરસરિત્તીર્થે સદા નિર્યલે
સ્નાત્વા દ્વાદશ વત્સરાન વનગિરૌ તત્રાવસન્નિર્મલાઃ ॥ ૨૧॥

ભક્ત્યાનર્ચુરિમે વૃષાચલપતિં શ્રીશૈશવં સુન્દરં
લોકેશં વિધિવદ્વિષટ્કશરદઃ સ્થિત્વા જગન્મોહનમ્ ।
દુર્વાસાપ્રમુખાઃ પ્રણમ્ય મુનયસ્તસ્ય પ્રસાદેન તે
તસ્માત્ સત્વરમાયયુઃ સુમનસઃક્ષેત્રં વરાહાખ્યકમ્ ॥ ૩૦॥

તત્કાલે સુતપાસ્તતો મુનિવરાન્ મણ્ડૂકવેષોજ્જ્વલઃ
સાન્ત્વેનાહ પુનઃ પ્રણમ્ય તુ કદા મણ્ડૂકતાપાસ્યતિ ।

એવં તં તુ વદન્તમાર્તમનઘાઃ સર્વે મુનીન્દ્રાસ્તતો
હ્યસ્માભિઃ સહ યાસ્યસીતિ સુતપસ્તૂચુઃ શુચં મા કૃથાઃ ॥ ૩૧॥

તત્ર દ્વાદશવત્સરાનપિ નિવત્સ્યામો વયં તત્ર વૈ-
હ્યસ્માભિશ્ચ ભવિષ્યસિ પ્રવસતો નાના તવ ક્ષ્માધરઃ ।
તીર્થે ચાપિ ભવિષ્યતિ સ્વયમપિ ત્વાયાતુ મઞ્જીરજા
ગઙ્ગા સુન્દરદોઃ કરોતિ ભગવાન્ સાન્નિધ્યમેવ સ્વયમ્ ॥ ૩૨॥

તત્ર ત્વં ભવ સુન્દરાહ્વયહરિં ત્વારાધ્ય મુક્તો ભવે
રિત્યેવં વદતાં મુનિસ્તુ સુતપાઃ શ્રુત્વા તુ તેષાં વચઃ ।
સાર્ધં તૈઃ સહસાગમત્ સ તુ મહત્તત્રૈવ ચક્રે તપ
સાન્નિધ્યં સ ચ સુન્દરઃ સમકરોત્તસ્યૈવ યોગીશિતુઃ ॥ ૩૩॥

તત્રૈવાવિરભૂત્તદા ચ તટિની મઞ્જીરજાતા તતઃ
સ્નાત્વા સ પ્રયતસ્તતસ્તુ સુતપા નિર્મુક્તમણ્ડકતઃ ।
તત્રાસૌ પરમાસને તુ વિધિવત્તસ્મિન્નિવિષ્ટો મુનિઃ
સારૂપ્યં સ ચ સુન્દરસ્ય તમગાદારાધ્ય સમ્યક્તતઃ ॥ ૩૪॥

અન્યે વાપિ તુ યે વૃષાચલતટેષ્વાકીટમાખણ્ડલં
તદ્દેશેષુ વસન્તિ તેઽપિ સકલા મુક્તા હિ નો સંશયઃ ।
શ્રીમત્સુન્દરપાદપઙ્કજલસન્મઞ્જીરજાસ્નાનતઃ
સર્વે સુન્દરદોપદાબ્જયુગયોઃ કૈઙ્કર્યસામ્રાજ્યગાઃ ॥ ૩૫॥

શુક્લાયામદુલે ફલેસુફલદે શ્રીમત્તલામાસિ વા
દ્વાદશ્યાં કનકાચલે બનગિરૌ મઞ્જીરગઙ્ગોદકે ।
યઃ સ્નાતિ પ્રયતો નરસ્તુ સકલૈઃ પાપૈસ્તદા મુચ્યતે
દીર્ઘાયુશ્ચ ધનં ચ તસ્ય ભવતિ ક્ષેમં સ યાતિ ધ્રુવમ્ ॥ ૩૬॥

શ્રીમત્સોમકુલેઽતુલે તુ ભવતાં રાજ્ઞાં વરઃ શ્રીમતા ।
મિન્દ્રદ્યુમ્નસુતઃ પુરૂરવવિભોઃ પૌત્રો મહાવૈભવઃ ।
ગમ્ભીરો મલયાચલધ્વજવરચૂડામણિજ્ઞાનિનાં
રાજા રાજશિરોમણિઃ ક્ષમવતામસ્તિ પ્રશસ્તો વિભુઃ ॥ ૩૭॥

મેરોદક્ષિણપાર્શ્વગાન્ સ તુ પુનર્જિત્વા સમસ્તાન્નૃપાન
શ્રીમાન્ સ્વસ્થ તુ નામાચિહ્નમતુલં મેરો લિખિત્વા પુનઃ ।
અગમ્યાથ પુરોધસા સહ શરત્સાહસ્રક નીતિમાન્
ભૂપાલો ન્યવસત્ત્વગસ્ત્યમુનિના તેનૈવ સન્મન્ત્રિણા ॥ ૩૮॥

કદાચિત્તમુવાચેદમગસ્ત્યમુનિસત્તમમ્ ।
વિમાન કામગં મેઽદ્ય દાતવ્યં મુનિપુઙ્ગવ ॥ ૩૯॥

તદ્વિમાનં સમારુહ્ય ગઙ્ગાસાગરસઙ્ગમે ।
સ્નાત્વા ગયાયામભ્યર્ચ્ય માધવં ચ ગદાધરમ્ ॥ ૪૦॥

દિને દિને મહાભાગૈર્મુનિભિર્વેદપારગૈઃ ।
બ્રાહ્મણૈર્ભગવદ્ભક્તૈઃ પૂજયિત્વા તુ માધવમ્ ॥ ૪૧॥

પુનઃ પુનઃ સમાગમ્ય મધુરાયાં મહામતિઃ ।
ન્યવસદ્ભૂમિપાલોઽસૌ મલયાચલકેતુમાન્ ॥ ૪૨॥

ભૂપાલો મલયધ્વજો ગુણનિધિઃ શ્રીમાન્ કદાચિત્ પુનઃ ।
વિષ્ણોરર્ચનતો યયૌ સ તુ ગયામાખણ્ડલઃશ્રીમતામ્ ।
દિવ્યે શ્રીવૃષભાચલે સમપતચ્છાયા વિમાનસ્ય વૈ
તત્કાલે કિલ તાં તદૈવ જગૃહુર્વિષ્ણોર્મહાપાર્ષદાઃ ॥ ૪૩॥

તત્કાલે વૃષભાદ્રિગઃ કરુણયા તેનાતિખિન્નં નૃપં
ત્વવ્યક્તોજ્જ્વલમૂર્તિમાન સમધુરં વાક્યં મહાનબ્રવીત્ ।
ભો ભો રાજશિરોમણે ગુણનિધે મા ભૂદ્ભવાન્ વ્યાકુલો
મેઘાનાં સ્તનિતોજ્જ્વલત્સ્વનયુતઃ શ્રીમન્મહાસુન્દરઃ ॥ ૪૪॥

મત્પાદમણિમઝીરપ્રભવા સરિતાં વરા ।
પર્વતેઽસ્મિન્ પ્રવહતિ ગઙ્ગાતોયાધિકા શુભા ॥ ૪૫॥

મત્તલાકોટિસમ્ભૂતા હ્યતુલા શુભવારિણી ।
તશ્યાં સ્નાનં કુરુ પ્રિં કોટિજન્મકૃતં ત્વયમ્ ॥ ૪૬॥

હરત્યશેષ નૃપતે મત્પાદપભવા નદી ।
શુદ્ધભક્તોપભોગ્યા સા મમાત્યર્થ પ્રિયઙ્કરી ॥ ૪૭॥

ત્રૈવિકમે મમ ગદૈ પ્રગૃહ્ય વિપુલં નૃપ ।
સંક્ષાલિતં પદ્મભુવા ધર્મેણ દ્રવરૂપિણા ॥ ૪૮॥

તદા ગઙ્ગાભવદ્વ્યોમ્નિ ત્રિપથેતિ ચ વિશ્રુતા ।
ત્રયાણાં જગતાં પાપં વિનાશયતિ નિત્યશઃ ॥ ૪૯॥

તાં ગઙ્ગાં શિરસા શૂલી દધાર સ્વાત્મશુદ્ધયે ।

મત્પદસ્થતુલાકોટિપ્રભવેયં નદી શુભા ॥ ૫૦॥

મુક્તિં દદાતિ સર્વેષાં પશૂનાં પક્ષિણામપિ ।
ભવાનત્રૈવ સંસ્નાતો મદારાધનમાચર ॥ ૫૧॥

મત્પદદ્વન્દ્વમારાધ્ય મદ્ભક્તૈશ્ચ પુરસ્કૃતઃ ।
મદારાધનકર્માણિ કુરુષ્વ પ્રયતાત્મવાન્ ॥ ૫૨॥

ધર્મેણ નિર્મિતં પૂર્વં વિમાનં સોમસન્નિભમ્ ।
તસ્મિન્નિહ તુ વત્સ્યામિ બ્રહ્મણો યાવદાયુષમ્ ॥ ૫૩॥

અર્ચયિષ્યન્તિ રાજાનઃ કાલે કાલે મહામતે ।
ભૂત્વા મદ્ભક્તભક્તસ્ત્વં વિભવઃ સ્વાર્જિતૈરિહ ॥ ૫૪॥

સ્થિત્વૈવ સદ્ગતિં ભૂપ ગમિષ્યસિ ન સંશયઃ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા ન્યવસત્ સ મહીપતિઃ ।
વિભવૈસ્તં સમારાધ્ય વૃષાદ્રિતટવાસિનમ્ ॥ ૫૫॥

માણિક્યૈઃ સ્ફટિકૈઃ શુભૈર્મરતકૈઃ પ્રત્યુપ્તદિવ્યોલ્લસ
સોમચ્છન્દવિમાનમધ્યવિલસદ્દિવ્યોજ્જ્વલદ્વેદિગમ્ ।
સર્વાભીષ્ટદકલ્પકં પ્રણમતામુદ્યોગચક્રોજ્જ્વલ
શ્રીમદ્દક્ષિણપાણિપઙ્કજશુભં દોર્દણ્ડષણ્ડોજ્જ્વલમ્ ॥ ૫૬॥

ઈષત્ફુલ્લજપાપ્રસૂનવિકસત્સંવિદ્રુમશ્રીલસ
દિમ્બાભાધરપલ્લવં કમલયા પ્રારૂઢવક્ષઃસ્થલમ્ ।
ચન્દ્રામ્ભોજસુધારસૈવિલસિતૈઃ પ્રસ્પર્ધિ દિવ્યાનનં
શ્રીમત્કૌસ્તુભરત્નભૂષણમહાહારોલ્લસત્કન્ધરમ્ ॥ ૫૭॥

આકર્ણાયતપદ્મપત્રાફરદ્વન્દ્વોલ્લસલોચનં-
અધ્યે લોચનવારિધેઃ પ્રવિલત્સેતૂજ્જ્વલન્નાસિકમ્ ।
બાલાર્કોજ્જ્વલદિન્ચરત્નમકુન્દં પદ્મોપરિરિફીતક
શ્રીમદ્દિવ્યમધુવ્રતાયિતલસત્કાલસ્થપુણ્ડ્રોજ્જ્વલમ્ ॥ ૫૮॥

કૌશેયોજ્જ્વલવિગ્રહ સુલલિતં ચાપાદચૂડં સદા
શ્રીમન્તં વનશૈલદિવ્યતિલકં ત્રૈલોક્યસમ્મોહનમ્ ।
એવં સુન્દરબાહુમમ્બુજપદં દૃષ્ટાનુભૂય પ્રભુ
સંસ્તુત્ય પ્રણતઃ સદા પુલકિતઃ સન્તોષપૂર્ણાશયઃ ॥ ૫૯॥

શ્રીમત્સુન્દરદો પદામ્બુજતુલાકોટિપ્રભૂતોદક

સ્નાનોદ્ભૂતમહાવબોધવિભવઃ કૈઙ્કર્યસામ્રાજ્યગઃ ।
કુર્વસ્તસ્ય ચ સુન્દરસ્ય વિવિધાન્ બ્રહ્મોત્સવાદ્યાન્ મહાન્
ભૂપાલો ભલયધ્વજો વિજયતે વૈરાગ્યનિષ્ઠાગ્રણીઃ ॥ ૬૦॥

રાજા સોઽપિ તતસ્તદા ભગવતઃ કર્તું વસન્તોત્સવં
શ્રીમત્સુન્દરદોષ્ણિ દિવ્યવિભવ વિજ્ઞાપયામાસ સઃ ।
તસ્ય શ્રીભગવાન્ મહાદ્ભુતતમં સન્તુષ્ય ચૈત્રોત્સવઃ
કર્તવ્યો ભવતેત્યસૌ નિયમનં ચક્રે મહાસુન્દરઃ ॥ ૬૧॥

ચૈત્રે માસિ તતઃ પરં નરપતિઃ શ્રીપૌર્ણમાસ્યાં દિને
તત્કાલાનુગુણૈર્વિલક્ષણરસૈઃ કર્પૂરગન્ધાદિભિઃ ।
શ્રીવૈખાનસશાસ્ત્રતો દ્વિજવરૈર્વિદ્વદ્વરૈરર્ચકૈઃ
શ્રીમન્તં સમપૂજયદ્દૃષગિરે થં મહાસુન્દરમ્ ॥ ૬૨॥

તતો વિહારયાત્રાર્થમુત્સવાન્તે હરિ નૃપઃ ।
પીતામ્બરમુદારાનં સર્વભૂષણભૂષિતમ્ ॥ ૬૩॥

દિવ્યં વિમાનમારોપ્ય કામગં રત્નભૂષિતમ્ ।
નિર્જગામ બહિર્વિષ્ણોઃ સન્તોષાર્થ સ ભૂપતિઃ ॥ ૬૪॥

ભેરીશઙ્ખમૃદઙ્ગવાદ્યમધુરશ્રીવેણુવીણાસ્વનૈ
ર્લોકાનાં સ્વનિતૈઃ સ્તવૈશ્ચ યમિનાં ઘોષૈર્મુનીનાં શુભૈઃ ।
શ્રીમાન્ સુન્દરબાહુરિન્દુવદનઃ શબ્દાયમાનો દિશા
છત્રાદ્યૈશ્ચ પરિચ્છદૈર્ગજમુખૈઃ સંવારિતો નિર્ગતઃ ॥ ૬૫॥

તસ્મિન્ શ્રીમતિ નિર્ગતે સુરમુખાઃ શક્રાદયઃ સુન્દરે
સેવાર્થ સ્વવિમાનકૈશ્ચ પુરતસ્ત્વભ્યાગતાઃ પ્રેમતઃ ।
હર્ષાદપ્સરસઃ સ્ત્રિયશ્ચ નનૃતુઃ શ્રીનારદાદ્યાસ્તથા
ગન્ધર્વાસ્તુ જગુશ્ચ કર્ણમધુરં ઘુષ્યન્તિ વેદાન્ દ્વિજાઃ ॥ ૬૬॥

એવં વૃષાદ્રેર્નૈરૃત્યાં ગત્વા યોજનમુત્તરે ।
નાગાદ્રેઃ કૃતમાલાયાસ્તીરે મધુપુરાહ્વયે ॥ ૬૭॥

વિરજ્ય મણ્ટપં રાજા દિવ્યલક્ષણસંયુતમ્ ।
સર્વાલઙ્કારસંયુક્તં તત્ર સિંહાસને શુભે ॥ ૬૮॥

લાવણ્યનામકં વિષ્ણુ સંસ્થાપ્ય સ મહીપતિઃ ।
આનર્ચ વિવિધૌં ગૈરર્થપાદ્યાદિભિહરિમ્ ॥ ૬૯॥

દિવ્યગન્ધયુતૈસ્તીર્થૈ મન્ત્રપુતૈર્મનોહરૈઃ ।
અભિષિચ્યાપ્યલકૃત્ય મહાશ્ચન્દનાદિભિઃ ॥ ૭૦॥

ઉપચારૈઃ સમભ્યર્ચ્ય દર્શયિત્વા ચ દીપિકાઃ ।
અસલ્યેયા ઘૃતૈઃ સિક્તાઃ સન્તોષાય હરેર્નૃપઃ ॥ ૭૧॥

મહાર્હાણિ વિચિત્રાણિ હવીંષિ બહુલાનિ ચ ।
અપૂપાદીંશ્ચ રુચિરાન્ મહાર્હાણિ ફલાનિ ચ ॥ ૭૨॥

તામ્બૂલિકાઃ સકર્પૂરા મધુપર્કાદિકાસ્તથા ।
નિવેદ્ય વિષ્ણુભક્તેભ્યો દદૌ તાનિ યથેષ્ટતઃ ॥ ૭૩॥

એવં સુન્દરરાજસ્ય વર્તમાને મહોત્સવે ।
તત્રત્યાસ્તે નદીતીરે તપસ્યન્તો મુનીશ્વરાઃ ॥ ૭૪॥

રોમશાદ્યાસ્તથાન્યે ચ હરિં દ્રષ્ટું સમાગતાઃ ।
નિષેવ્ય તુ મહં દિવ્યં ભગવદ્વીક્ષણાપ્લુતાઃ ॥ ૭૫॥

કૃતાર્થાઃ સર્વ એવૈતે પ્રાર્થયન્ મધુસૂદનમ્ ।
અહો મહોત્સવો દેવ નેત્રાનન્દઃ શરીરિણામ્ ॥ ૭૬॥

અહો ભાગ્યમહો ભાગ્યં રાજ્ઞસ્તુ મધુસૂદન ।
લક્ષ્મીપતે વયં ધન્યાઃ શ્રીમન્ પઙ્કજલોચન ॥ ૭૭॥

એવમેવાત્ર ભવતાદુત્સવઃ પ્રતિવત્સરમ્ ।
ઉજ્જીવનાય જગતાં કૃપયા ભવતો હરે ॥ ૭૮॥

મઞ્જીરતટિનીતીર્થે નિત્યં સ્નાતું ન શક્નુમઃ ।
અતઃ સાપ્યત્ર નાગાહગિરાવાવિર્ભવત્વિતિ ॥ ૭૯॥

ઇત્થં વિજ્ઞાપિતો વિષ્ણુર્વિપ્રેન્દ્રૈઃ કરુણાનિધિઃ ।
ભક્તેષ્ટદો વરં પ્રાદાત્ પરમં કમલાપતિઃ ॥ ૮॥

તદૈવ નાગાદ્રિતટે મઞ્જીરતટિની હરેઃ ।
આજ્ઞયા પ્રવહત્યેષા જગતાં પાવનાય ચ ॥ ૮૧॥

નામાદ્રાવુદયાત્સૈવ નાગતીર્થમિતીર્યતે ।
તસ્યાં સ્નાત્વા તુ ઋષયઃ પરમાં સિદ્ધિમાગતાઃ ॥ ૮૨॥

રાજાસૌ મલયધ્વજો વૃષાઙ્ગરેર્નાથસ્ય લક્ષ્મીપતેઃ
શ્રીનાગાહ્વગિરી મહાદ્ભુતરસૈરિત્થં વસન્તોત્સવમ્ ।

ચૈત્રે માસિ મહોત્સવં ભગવતઃ શ્રીપૌર્ણમાસ્યાં દિને
કૃત્વા તં સકુતૂહલં વનગિરિં સંપ્રાપયત્ સુન્દરમ્ ॥ ૮૩॥

પદ્મચન્દ્રામૃતરસપ્રસ્પર્ધિમુખમણ્ડલમ્ ।
વૃષાદ્રિતટગં વન્દે સદા સર્વાઙ્ગનુન્દરમ્ ॥ ૮૪॥

રાજ્ઞા શ્રીમલયધ્વજેન મહતા દેવૈરગસ્ત્યાદિભિઃ
શ્રીમચ્ચૈત્રમહોત્સવો મુનિવરઃ પ્રત્યબ્દમત્યદ્ભુતમ્ ।
શ્રીનાગાઇગિરાવકારિ તુ પુરા શ્રીસુન્દરસ્ય પ્રભોઃ
લાવણ્યામ્બુનિર્વૃષાચલપતેઃ ક્ષીરાબ્ધિકન્યાપતેઃ ॥ ૮૫॥

ઇદાનીન્તનતદ્રીતિ કશ્ચિદ્રાજા કરોત્યસૌ ।
ઇત્યેષા કિંવદન્તી તુ કેનચિદ્ધેતુના કચિત્ ॥ ૮૬॥

ઇદાનીન્તનચૈત્રોત્સવવૈભવં કૃણામઃ
કલ્યાણં દિશતાદશેષજગતાં રાજાધિરાજઃ શ્રિયા
સાર્ધં દિવ્યવૃષાચલે મણિમયે સિંહાસને સુસ્થિતઃ ।
મુક્તારત્નકિરીટકૌસ્તુભમુખૈઃ શ્રીભૂષણભૂષિતઃ
સર્વાભીષ્ટફલપ્રદઃ પ્રણમતાં મોહઙ્કરઃ સુન્દરઃ ॥ ૮૭॥

વન્દે દિવ્યસુવર્ણનિર્મિતમહાપ્રાકારરત્નોજ્જ્વલ
સોમચ્છન્દવિમાનગોપુરમણિસ્તમ્ભોલ્લસન્મણ્ટપૈઃ ।
અન્યૈશ્ચાપિ વિલક્ષણૈર્મરતકસ્થૂણાવૃતૈર્મણ્ટપૈ
ર્ભાન્તં શ્રીવૃષભાચલં મણિમયં ત્રૈલોક્યસમ્ભૂષણમ્ ॥ ૮૮॥

સેનાન્યપ્રમુખૈર્વિલક્ષણગુણૈર્નિત્યૈઃ સદા સંશ્રિતં
બ્રહ્મેશાનમહેન્દ્રમુખ્યવિબુધૈરન્યૈર્મનુષ્યૈર્જનૈઃ ।
સ્વસ્વાભીષ્ટમહાફલાત્ પરિનિણતં યોગીશ્વરૈઃ સંસ્તુતં
તિર્યગ્જાતિભિરાવૃતં વનગિરિ ગાઙ્ગેયરૂપં ભજે ॥ ૮૯॥

ચૈત્રે પુષ્પિતવૃક્ષજાતિનિવહે ક્ષેમઙ્કરે દેહિનાં
માસે સર્વમનોજ્ઞષોડશકલાપૂર્ણેન્દુસંલક્ષિતે ।
દિવ્યે શુક્લચતુર્દશીશુભદિને સંપ્રાપ્તચોરાકૃતિઃ
શ્રીમાન સુન્દરબાહુરિન્દુવદનસ્તસ્માત્ પ્રતસ્થે ગિરેઃ ॥ ૯૦॥

ચોરાકારધરં સુવર્ણકવચં શા દિદિવ્યાયુધં
શ્રીભૂષાસમલઙ્કૃતં મણિલસન્મુક્તાકિરીટોજ્જ્વલમ્ ।

નાનાવર્ણવિચિત્રરત્નકનકશ્રીવાહને સુસ્થિતં
ચૈત્રે માસિ ચતુર્દશીશુભદિને યાન્તં ભજે સુન્દરમ્ ॥ ૯૧॥

મધ્યેમાર્ગમહો સમસ્તજગતાં મોહઙ્કરં સુન્દરં
પશ્યલ્લોકરજઃકણૈર્દિનિ ભૂચિ પ્રચ્છાદયન્તં જનાન્ ।
ભેરીમુખ્યવિશેષવાદ્યનિવહૈઃ શબ્દાયમાનં દિશો
પન્દે સુન્દરબાઙમબુજમુખં સન્તોષપૂર્ણાશયમ્ ॥ ૯૨॥

શ્રીમદ્વેગવતીમહોત્તરતટે લક્ષ્મીપુરે મણ્ટપે
મુક્તાદામવિરાજિતે દિલસિતે સૌવર્ણસિંહાસને ।
તિષ્ઠન્તં કનકપ્રભં ભુવિ જનાનાહાદયન્તં મુદા
શ્રીભૂષાસમલઙ્કૃતં વૃષગિરે થં ભજે સુન્દરમ્ ॥ ૯૩॥

તત્ર શ્રીમણિમણ્ટપે વિલસિતે વિદ્વજ્જનૈઃ સંવૃતે।-
કૃત્વા મજનમુત્સવં પુનરપિ શ્રીભૂષણૈર્ભૂષિતમ્ ।
વન્દે દિવ્યમહોત્સવાર્થમખિલશ્રીવૈષ્ણવાનાં સતાં
સન્તોષં કૃતવન્તમદ્ભુતમહાદિવ્યપ્રસાદૈઃ શુભૈઃ ॥ ૯૪॥

શ્રીમદિવ્યમહાતુરઙ્ગકનકશ્રીવાહને ભૂષિતે
તિષ્ઠન્તં સમલઙ્કૃતં વિલસિતૈર્દિવ્યાયધૈર્ભષણૈઃ ।
ગોદોચ્છિષ્ટમહાસ્ત્રજં શુભઙ્કટં ધૃત્વા મહાકૌતુકં
પશ્યન્મોહનવિગ્રહં વૃષગિરે થં ભજે સુન્દરમ્ ॥ ૧૫॥

પ્રાતર્દિવ્યમહારથં શુભદિને શ્રીપૌર્ણમાસ્યાં હરિઃ
સન્તોષાત્ત સમારુરોહ ભગવાસ્તસ્યાકૃતેઃ સેવયા ।
બ્રહ્મેશાનમહેન્દ્રદેવવિબુધક્ષ્માપાલયોગેશ્વર
શ્રીવૈકુણ્ઠનિવાસિભૂસુરમુખાઃ સર્વે ચ મોહં ગતાઃ ॥ ૯૬॥

યત્રાસ્મિન્ ભુવને વિલક્ષણમહાદિવ્યસ્થલપ્રોલ્લસ
દિવ્યા મયવિગ્રહાશ્ચ નિખિલાસ્તિષ્ઠન્તિ ચિત્રગતાઃ ।
નાનારત્નસુવર્ણમૌક્તિકમયૈઃ શ્રીભૂષણૈર્ભૂષિતે
શ્રીમદિવ્યમહારથે વિલસિતં વન્દામહે સુન્દરમ્ ॥ ૯૭॥

અત્યર્કાનલદીપ્તપુષ્પકરથે માલામહાભૂષિતે
તારામણ્ડલસઙ્ગતે સુરભિતે દિવ્યામરૈરચિતે ।
બ્રહ્મેન્દ્રાર્ચિતપારિજાતકુસુમૈઃ સમ્પૂર્ણદિવ્યસ્થલે
ભક્તાભીષ્ટફલપ્રદે વિલસિતં વન્દામહે સુન્દરમ્ ॥ ૯૮॥

દિવ્યૈઃ શ્રીસનકાદિભિર્મુનિવરૈર્બ્રહ્માદિભિર્દૈવતૈ
ભૂપાલૈશ્ચ મહાસુરૈશ્ચ વિબુધૈઃ સ્ત્રીબાલવૃદ્ધૈર્ગણૈઃ ।
પુષ્પૈશ્ચાપિ સમર્ચિતે સુરભિતૈર્દિવ્યૈઃ સમસ્તૈર્જનૈ-
શ્રીમદિવ્યમહારથે દિલસિતં વન્દામહે સુન્દરમ્ ॥ ૯૯॥

પ્રાતઃ સૂર્યમહોદયે શુભદિને શ્રીપૌર્ણમાસ્યાં તતઃ ।
શ્રીમદ્વેગવતીવિલક્ષણમહાનદ્યાં ગતઃ મુન્દરઃ ।
ગન્ધર્વામરકિન્નરાદિગરુડશ્રીનારદાદ્યૈર્બુધ
ગો તૈશ્ચાપિ કૃતૈર્દિશો મુખરયન્ન ઘોષૈર્જનાનાં શુભૈઃ ॥ ૧૦૦॥

શ્રીમાન્ વેગવતીગતસ્તત ઇમં ત્યક્ત્વા રથં સુન્દરો
નાનાલઙ્કૃતમણ્ટપેષુ તુરગશ્રીવાહનસ્થઃ પ્રભુઃ ।
સ્થિત્વા વીક્ષ્ય કુતૂહલાદ્બુધજનાન્મધ્યેમહામણ્ટપં
વિશ્રન્યાથ પુનઃ પ્રયાતિ તમિમં વન્દામહે સુન્દરમ્ ॥ ૧૦૧॥

ગત્વા ષટ્પદપટ્ટણં સહ જલક્રીડાવિશેષોત્સવં
સાયાહ્ને મહિતં વિલક્ષણગણૈઃ કૃત્વા મહાકૌતુકાત્ ।
સાધં ચોરકુલપ્રસૂતવિમલૈર્ભક્તૈઃ સમસ્તૈસ્તત
સ્તસ્યાન્તઃ પ્રવિશન્તમમ્બુજમુખં વન્દામહે સુન્દરમ્ ॥ ૧૦૨॥

તત્ર શ્રીમણિમણ્ટપે વિલસિતે સૌવર્ણસિંહાસને
સ્થિત્વા શ્રીતુરગં પરિષ્કૃતતનું ત્યક્ત્વા મહામજનમ્ ।
કૃત્વા દિવ્યમહાનુલેપનમહામાલાદિભિર્ભૂષણૈઃ
શ્રીમદ્ભિઃ પરિમણ્ડિતં વનગિરે થં ભજે સુન્દરમ્ ॥ ૧૦૩॥

ગાઙ્ગેયામલશેષવાહનમહો સૌવર્ણમલાદિમિ
મુક્તાદામમણીન્દ્રહારવિવિધશ્રીભૂષણૈર્ભૂષિતમ્ ।
આરોહન્તમનન્તસૂરિવિમલ શ્રીવૈષ્ણવૈઃ સંવૃતં
તત્ર શ્રીયતિસાર્વભૌમસહિતં વન્દે મહાસુન્દરમ્ ॥ ૧૦૪॥

મધ્યેરાત્રમહો તતસ્તુ ભગવાન્ શ્રીપૌર્ણમાસ્યાં યદા
મધ્યેવેગવતીં ધૃતોજ્જ્વલમહાદીપૈઃ સહસ્રજ્વલન્ ।
નૃત્યન્તઃ પ્રણમન્તિ કેચન તદા ગાયન્તિ સમ્મોહિતાઃ
ધુષ્યન્તઃ સ્તુતિમઙ્ગલં પુલકિતાઃ કેચિત્તુ મોહં ગતાઃ ॥ ૧૦૫॥

મધ્યેમાર્ગમહો વિચિત્રવિવિધશ્રીમણ્ટપેષુ પ્રભુ

શ્ચિત્રાલઙ્કૃતિચિત્રમાલ્યસફલશ્રીમત્સુ કૌતૂહલાત્ ।
સ્થિત્વા તેષુ વિહૃત્ય સજ્જનજનાન્ સંવીક્ષ્ય ગચ્છન્ સ મેં
ભૂયાત્ સુન્દરબાહુરમ્બુજમુખઃ કલ્યાણસૌખ્યપ્રદઃ ॥ ૧૦૬॥

લબ્ધ્વા તં મકરન્દમણ્ટપમહો સસ્થાસમ્ભૂષિતં
તત્સૌન્દર્યસુવીક્ષણાત્ ત્રિજગતાં રાજાધિરાટ્ સુન્દરઃ ।
શેષારૂઢમહાપ્રભુઃ પરિણતઃ સર્વૈર્મહાપણ્ડિતૈ
રત્યાશ્ચર્યાભૂન્મહાગુણગણઃ સન્તોષપૂર્ણાશયઃ ॥ ૧૦૭॥

આરુહાથ મહાસુવર્ણગડં સન્તોષકોલાહલૈ
લોકાનાં પ્રતિપહિને પ્રણમતાં શબ્દાયમાનં દિશઃ ।
મધ્યેમાર્ગમલઙ્કૃતે સકદલૈરિક્વાદિભિર્મણ્ટપે
ત્યક્ત્વા તં કનકાસને વિલસિતં વન્દામહે સુન્દરમ્ ॥ ૧૦૮॥

તત્રાસૌ દશરૂપધૃક્ પ્રણમતાં હષાર્થમુત્સાહતઃ-
પશ્યન્ મોહનમોહિનીવિલસિતં ધૃત્વા જગન્મોહકઃ ।
વીણાગાનરતં વિશેષરસિકર્ભક્તૈરનન્તૈઃ કૃતં
શ્રુત્વા હૃષ્ટમનાઃ સમસ્તજગતાં દદ્યાત્ સુખં સુન્દરઃ ॥ ૧૦૯॥

આરુહ્યામલલક્ષણૈઃ શુભકરં શ્રીવાહનં સુન્દર
સ્તસ્માદ્વેગવતીમહોત્તરતટે સંપ્રાપ્ય લક્ષ્મીપુરમ્ ।
ચોરાકારધરઃ સુવર્ણમકુટઃ પૂર્વાગતં વાહનં
ચારુહ્યામલલોચનઃ સ ભવતુ ક્ષેમઙ્કરો મે સદા ॥ ૧૧૦॥

તસ્માત્ પૂર્વમહાપથેન સહસા ગચ્છન્ મહાસુન્દર
શ્ચોરાખ્યામલસર્વલક્ષણમહાસમ્પન્નભક્તૈર્વૃતઃ ।
પાપિષ્ઠાનસુરાનિહત્ય વિબુધાન્ સન્તોષ્ય કોલાહલૈ
રસ્માકં ભગવાન્ સમસ્તજગતાં ભૂયાત્ પ્રભુઃ ક્ષેમદઃ ॥ ૧૧૧॥

લબ્ધ્વા શ્રીવનશૈલમમ્બુજમુખઃ શ્રીમન્મહાસુન્દર
સ્તત્ર શ્રીકમલાલયાકરધૃતશ્રીહસ્તપદ્મરતયા ।
સાર્ધં દિવ્યસુવર્ણનિર્મિતમહાસિંહાસને સુસ્થિતઃ
સન્તુષ્ટઃ શુભમઙ્ગલં વિતરતાદસ્માકમાદ્યઃ પ્રભુઃ ॥ ૧૧૨॥

દિવ્યશ્રીવૃષભાચલે મણિમયે શ્રીમન્મહામણ્ટપે
નાનારત્નવિચિત્રવર્ણકનકશ્રીદિવ્યસિંહાસને ।
ભૂમાભ્યાં કરપઙ્કજૈર્મૃદુતરૈઃ સંવાહિતાધિદ્વયઃ

સન્તુષ્ટઃ શુભમઙ્ગલં વિતરતાદસ્માકમાધઃ પ્રભુઃ ॥ ૧૧૩॥

જપાકુસુમબિમ્બાભવિમાધરભાસતે ।
વનશૈલનિવાસાય સુન્દરેશાય મઙ્ગલમ્ ॥ ૧૧૪॥

બાલાર્કશતસાહસ્રમકુટેન વિરાજતે ।
નિતાન્તદીર્ઘલલિતનાયનાય ચ મઙ્ગલમ્ ॥ ૧૧૫॥

આપાદમૌલિપર્યન્તમભિજાતાઙ્ગસમ્પદે ।
મણિમઞ્જુલમઞ્જૂષાભૂષણાય ચ મઙ્ગલમ્ ॥ ૧૧૬॥

ઉદ્યોગચક્રવિલસદ્વામેતરકરાય ચ ।
અર્ધેન્દુલલિતોદારલલાટાય ચ મઙ્ગલમ્ ॥ ૧૧૭॥

ભૂષિતે રત્નસઙ્ઘાતૈર્વેષભાખ્યમહાગિરૌ ।
સોમચ્છન્દવિમાનસ્થસુન્દરેશાય મઙ્ગલમ્ ॥ ૧૧૮॥

॥ ઇતિ શ્રીવાનાદ્રિનાથસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*Shri Vanadrinatha Stotram*

pdf was typeset on June 11, 2024

Please send corrections to *sanskrit@cheerful.com*